# Shri Dattatreya Stotram

# શ્રીદત્તાત્રેયસ્તોત્રમ્

## Document Information

Text title : Dattatreya Stotram 14

File name : dattastotram14.itx

Category : deities_misc, dattAtreya

Location : doc_deities_misc

Description/comments : Short collection of dhyAnashlokas.

Latest update : October 3, 2023

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

October 3, 2023

*sanskritdocuments.org*

# શ્રીદત્તાત્રેયસ્તોત્રમ્

ૐ નમો બ્રહ્માદિભ્યો બ્રહ્મવિદ્યા સમ્પ્રદાય કર્તૃભ્યો
વંશર્ષિભ્યો નમો ગુરુભ્યઃ ॥
બ્રહ્માનન્દં પરમસુખદં કેવલં જ્ઞાનમૂર્તિં
દ્વન્દ્વાતીતં ગગનસદૃશં તત્ત્વમસ્યાદિ લક્ષ્યમ્ ।
એકં નિત્યં વિમલમચલં સર્વધીસાક્ષિભૂતં
ભાવાતીતં ત્રિગુણરહિતં સદ્ગુરું તં નમામિ ॥
ગુરુર્બ્રહ્મા ગુરુર્વિષ્ણુઃ ગુરુર્દેવો મહેશ્વરઃ ।
ગુરુસ્સાક્ષાત્ પરબ્રહ્મ તસ્મૈ શ્રી ગુરવે નમઃ ॥
કાષાયવસ્ત્રં કરદણ્ડ ધારિણં
કમણ્ડલું પદ્મકરેણ શઙ્ખમ્ ।
ચક્રં ગદા ભૂષિત ભૂષણાઢ્યં
શ્રીપાદરાજં શરણં પ્રપદ્યે ॥
ઔદુમ્બરઃ કલ્પવૃક્ષઃ કામધેનુશ્ચ સઙ્ગમઃ ।
ચિન્તામણિર્ગુરોઃ પાદૌ દુર્લભા ભુવનત્રયે ॥
કૃતે જનાર્દનો દેવઃ ત્રેતાયાં રઘુનન્દનઃ ।
દ્વાપરે રામકૃષ્ણૌ ચ કલૌ શ્રીપાદવલ્લભઃ ॥
માલાકમણ્ડલુરથઃ કરપદ્મયુગ્મે
મધ્યસ્થ પાણિયુગલે ડમરુત્રિશૂલે ।
યસ્યસ્ત ઊર્ધ્વકરયોઃ શુભશઙ્ખચક્રે
વન્દે તમત્રિવરદં ભુજષટ્કયુક્તમ્ ॥

શ્રીદત્તશરણં મમ ।

ઇતિ શ્રીદત્તાત્રેયસ્તોત્રં સમ્પૂર્ણમ્ ।

Proofread by Chandrasekhar Karumuri

*Shri Dattatreya Stotram*

pdf was typeset on October 3, 2023

Please send corrections to *sanskrit@cheerful.com*